ऽपि प्रत्यवयवं प्रत्यक्षेण गृह्येत नच चैवं नियतं गृह्यते। प्रत्येकं परिसमाप्तौ चावयविनः कार्य्येणाधिकाराच्चास्य चैकत्वात् शृङ्गेणापि स्तनकार्य्यं कुर्यात् उरसा च पृष्ठकार्य्यं, न चैवं दृश्यते। प्रागुत्पत्तेश्च कार्य्यस्यासत्त्वे उत्पत्तिरकर्त्तृका निरात्मिका च स्यात्। उत्पत्तिश्च नाम क्रिया सा सकर्त्तृकैव भवितुमर्हति गत्यादिवत्। क्रिया च नाम स्यादकर्त्तृका चेति विप्रतिषिद्ध्येत। घटस्य चोत्पत्तिरुच्यमाना न घटकर्त्तृका किन्तर्ह्यन्यकर्त्तृकेति कल्प्या स्यात् तथा कपालादीनामप्युत्पत्तिरुच्यमानान्यकर्त्तृकैव कल्प्येत तथाच सति घटउत्पद्यते इत्युक्ते कुलालादीनि कारणान्युत्पद्यन्त इत्युक्तं स्यात् न च लोके घटउत्पद्यत इत्युक्ते कुलालादय उत्पद्यमानाः प्रतीयन्ते उत्पन्नताप्रतीतेश्च। अथ स्वकारणसत्ता सम्बन्ध एवोत्पत्तिरात्मलाभश्च कार्य्यस्येति चेत् कथमलब्धात्मकं सम्बध्येतेति वक्तव्यं, सतोर्हि द्वयोः सम्बन्धः सम्भवति न सदसतोरसतो र्वा। अभावस्य च निरुपाख्यत्वात् प्रागुत्पत्तेरिति मर्य्यादाकरणमनुपपन्नम्। सतां हि लोके क्षेत्रगृहादीनां मर्य्यादा दृष्टा नाभावस्य। न हि वन्ध्यापुत्रो राजा बभूव प्राक् पूर्णवर्मणोऽभिषेकादित्येवं जातीयकेन मर्य्यादाकरणेन निरुपाख्यो वन्ध्यापुत्रो राजा बभूव भवति भविष्यतीति वा विशेष्यते। यदि च वन्ध्यापुत्रः कारकव्यापारादूर्द्ध्वमभविष्यत् तत इदमप्युपापत्स्यत कार्य्याभावोऽपि कारकव्यापारादूर्द्ध्वं भविष्यतीति। वयन्तु पश्यामो वन्ध्यापुत्रस्य कार्य्याभावस्य चाभावत्वाविशेषात् यथा वन्ध्यापुत्रः कारकव्यापारादूर्द्ध्वं न भविष्यति एवं कार्य्याभावोऽपि कारकव्यापारादूर्द्ध्वं न भविष्यतीति। नन्वेवं सति कारकव्यापारोऽनर्थकः प्रसज्येत, यथैव हि प्राक्सिद्धत्वात् कारणस्य स्वरूपसिद्धये न कश्चिद्व्याप्रियते एवं प्राक्सिद्धत्वात् तदनन्यत्वाच्च कार्य्यस्वरूपसिद्धयेऽपि न कश्चिद्व्याप्रियेत व्याप्रियते च, अतः कारकव्यापारार्थवत्त्वाय मन्यामहे प्रागुत्पत्तेरभावः कार्य्यस्येति। नैष दोषः यतः कार्य्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते। कार्य्याकारोऽपि कारणस्यात्मभूत एव अनात्मभूतस्यानारभ्यत्वादित्यभाणि। न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति न हि देवदत्तः सङ्कोचितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्वं गच्छति, स एवेति प्रत्यभिज्ञानात्। यथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति, मम पिता मम माता मम भ्रातेति प्रत्यभिज्ञानात्। जन्मोच्छेदानन्तरित्वात्तत्र युक्तं नान्यत्रेति चेन्न क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात्। अदृश्यमानानामपि वटधानादीनां समानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा तेषामेवावयवानामपचयवशाददर्शनापत्तावुच्छेदसंज्ञा। तत्रेदृग्जन्मोच्छेदान्तरितत्वेन चेदसतः सत्त्वापत्तिः सतश्चासत्त्वापत्तिः तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसङ्गः। तथा बाल्ययौवनस्थाविरेष्वपि भेदप्रसङ्गः पित्रादिव्यवहारलोपप्रसङ्गश्च। एतेन क्षणभङ्गवादः प्रतिवदितव्यः। यस्य पुनः प्रागुत्पत्तेरसत् कार्य्यं तस्य निर्व्विषयः कारकव्यापारः स्यात् अभावस्य विषयत्वानुपपत्तेः आकाशस्याहननप्रयोजनखड्गाद्यनेकायुधप्रसक्तिवत्। समवायिकारणे व्यापारः कारकव्यापारः स्यादितिचेन्न अन्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसङ्गात्। समवायिकारणस्यैवात्मातिशयः कार्य्यमितिचेन्न अतस्तर्हि सत्कार्य्यापत्तिः। तस्मात् क्षीरादीन्येव दध्यादिद्रव्यादिभावेनावतिष्ठमानानि कार्य्याख्यां लभन्त इति न कारणादन्यत्कार्य्यं वर्षशतेनापि शक्यं कल्पयितुम्। तथा च मूलकारणमेवान्त्यात्कार्य्यात् तेन तेन कार्य्याकारेण नटवत् सर्व्वव्यवहारास्पदत्वं प्रतिपद्यते। एवं युक्तेः कार्य्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वञ्च कारणादवगम्यते। शब्दान्तराच्चैतदवगम्यते। पूर्व्वसूत्रे असद्व्यपदेशिनः शब्दस्योदाहृतत्वात्ततोन्यः सद्व्यपदेशी शब्द शब्दान्तरः "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्यादि। "तद्धैक आहुरसदेवेदमग्र आसीदिति" चासत् पक्षमुपक्षिप्य "कथमसतः सज्जायेत?" इत्याक्षिप्य "सदेव सोम्येदमग्र आसीत्" इत्यवधारयति। तत्रेदंशब्दवाच्यस्य कार्य्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात् सत्त्वानन्यत्वे प्रसिद्ध्यतः। यदि तु प्र। गुत्पत्तेरसत्कार्य्यं स्यात् पश्चाच्चोत्पद्यमानं कारणे समवेयात् तदन्यत्कारणात् स्यात् तत्र "येनाश्रुतं श्रुतं भवतीयं प्रतिज्ञा पीड्येत सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते" भा०। "पटवच्च" शा० सू०। "यथा च संवेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किञ्चान्यद्द्रव्यमिति स एव प्रसारितो यत् संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो गृह्यते स एव प्रसारणसमयेऽपि विशिष्टायामविस्तारो गृह्यते न संवेष्टितरूपादयं भिन्नः पटः इति। एवं तन्त्वादिकारणावस्थं पटादि